All PDF Collection
PDF Seva

# ॥ श्री कालिका कवचम् ॥



## १. विनियोग

अस्य श्री कालिका कवचस्य भैरव ऋषिः,अनुष्टुप छन्दः,
श्री कालिका देवता,शत्रुसंहारार्थ जपे विनियोगः ॥

## २. ध्यानम्

ध्यायेत् कालीं महामायां त्रिनेत्रां बहुरूपिणीम् ।
चतुर्भुजां ललज्जिह्वां पूर्णचन्द्रनिभाननाम् ॥

नीलोत्पलदलश्यामां शत्रुसंघविदारिणीम् ।
नरमुण्डं तथा खड्गं कमलं च वरं तथा ॥

निर्भयां रक्तवदनां दंष्ट्रालीघोररूपिणीम् ।
साट्टहासाननां देवी सर्वदा च दिगम्बरीम् ॥

शवासनस्थितां कालीं मुण्डमालाविभूषिताम् ।
इति ध्यात्वा महाकालीं ततस्तु कवचं पठेत् ॥

PDFSeva.Net

## ३. कवच पाठ

ॐ कालिका घोररूपा सर्वकामप्रदा शुभा ।
सर्वदेवस्तुता देवी शत्रुनाशं करोतु मे ॥

ॐ ह्रीं ह्रीं रूपिणीं चैव ह्रां ह्रीं ह्रां रूपिणीं तथा ।
ह्रां ह्रीं क्षों क्षौं स्वरूपा सा सदा शत्रून विदारयेत् ॥

श्रीं ह्रीं ऐं रूपिणी देवी भवबन्धविमोचिनी ।
हुँ रूपिणी महाकाली रक्षास्मान् देवि सर्वदा ॥

यया शुम्भो हतो दैत्यो निशुम्भश्च महासुरः ।
वैरिनाशाय वन्दे तां कालिकां शंकरप्रियाम् ॥

ब्राह्मी शैवी वैष्णवी च वाराही नारसिंहिका ।
कौमार्यैन्द्री च चामुण्डा खादन्तु मम विद्विषः ॥

सुरेश्वरी घोररूपा चण्डमुण्ड विनाशिनी ।
मुण्डमालावृतांगी च सर्वतः पातु मां सदा ॥

PDFSeva.Net

## ४. मारण एवं उच्चाटन मन्त्र

ह्रीं ह्रीं ह्रीं कालिके घोरे दंष्ट्रावराहे रुधिरप्रिये ।
रुधिरापूर्णवक्त्रे च रुधिरेणावृतस्तनी ॥

"मम शत्रून् खादय खादय, हिंस हिंस, मारय मारय, भिन्धि भिन्धि, छिन्धि छिन्धि, उच्चाटय उच्चाटय, द्रावय द्रावय, शोषय शोषय स्वाहा । ह्रां ह्रीं कालीकायै मदीय शत्रून् समर्पयामि स्वाहा ।"

## ५. महा वशीकरण एवं ऐश्वर्य मन्त्र

"ॐ जय जय किरि किरि, किटी किटी, कट कट, मदं मदं, मोहय मोहय, हर हर मम रिपून् ध्वंस ध्वंस, भक्षय भक्षय, त्रोटय त्रोटय यातुधानान् चामुण्डे, सर्वजनान् राज्ञो राजपुरुषान् स्त्रियो मम वश्यान् कुरु कुरु, तनु तनु धान्यं धनं मेऽश्वान् गजान् रत्नानि दिव्यकामिनी: पुत्रान् राजश्रियं देहि यच्छ, क्षां क्षीं क्षूं क्षैं क्षौं क्षः स्वाहा ॥"

शत्रुनाशकरे देवि सर्वसम्पत्करे शुभे ।
सर्वदेवस्तुते देवि कालिके त्वां नमाम्यहम् ॥

**॥ इति रुद्रयामल तन्त्रोक्तं कालिका कवचं समाप्तम् ॥**

PDFSeva.Net